# Shri Ramashtaprasastutih

# श्रीरामाष्टप्रासस्तुतिः

## Document Information

Text title : rAmAShTaprAsastutiH

File name : rAmAShTaprAsastutiH.itx

Category : raama, aShTaka

Location : doc_raama

Proofread by : PSA Easwaran psawaswaran

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 22, 2023

*sanskritdocuments.org*

# श्रीरामाष्टप्रासस्तुतिः

कर्ता कञ्जभवात्मना त्रिजगतां भर्ता मुकुन्दात्मना
हर्ता यश्च हरात्मनाघमखिलं स्मर्ता च यस्योज्झति ।
धर्तारं धनुषः शरैस्सह तमादर्तारमार्तान्वयं
सर्तारोऽप्यपथे श्रिता रघुपतिं वर्तामहे निर्भयाः ॥ १॥

कारागारसमानसंसृतिनिराकाराय सच्चिन्मयं
धीरा यं शरणं व्रजन्ति भुवने नीरागमोहस्मयाः ।
तारादेवरमुख्यवानरपरीवाराय नीराकर-
स्फाराटोपहराय रावणजिते वीराय तस्मै नमः ॥ २॥

किं देवैरितरैः प्रपन्नभरणे सन्देहकृद्भिर्नृणां
विन्देयं यदि तान् विमूढ इति मां निन्देयुरार्या न किम् ।
किं देयं किमदेयमित्यविदुरं तं देहिनामिष्टदं
वन्दे कञ्चन वञ्चनामृगरिपुं मन्देतरश्रेयसे ॥ ३॥

गात्रेषु श्रममग्निमान्द्यमुदरे नेत्रे जडत्वं सह
श्रोत्रेणादिशती जरा विशति चेत् कोऽत्रेरयेन्मास्त्विति ।
दात्रे यत्तु नमोऽधुनाऽपि कलये स्तोत्रेण वित्ताशया
मैत्रे जन्मजुषे कुले कृतनतिर्नेत्रे तदुज्झाम्यहम् ॥ ४॥

जातो यो मिहिरान्वये नियमिना नीतो मखं रक्षितुं
शातोदर्यपि येन गौतममुनेः पूतोपलत्वं जहौ ।
छातोमापतिकार्मुकं सदसि यं सीतोपलेभे पतिं
नातो राघवतोऽपरं शरणमित्यातोद्यमाघोषये ॥ ५॥

नाहं पुत्रकलत्रमित्रविषये स्नेहं विहातुं क्षमः
साहङ्कारमिदं मनश्च न कृतोत्साहं गुरूपासने ।
देहं नश्वरमन्तकस्य न दया हा हन्त तेनोज्झितुं
मोहं नौमि रुचा विडम्बितपयोवाहं रघूणां पतिम् ॥ ६॥

श्रीहीनं व्यथयन्ति ये धनमदादेहीति याहीति तान्
वाहीकानिव न स्मराम्यपि पतीन् दोहीयसीनां गवाम् ।
देहीतीरितमन्तरेण ददते यो हीहितं देहिनां
पाहीति ब्रुवतो रघूद्वह दयावाही स सेव्योऽसि मे ॥ ७॥

श्रुत्वा वेदशिरांसि तन्निगदितं मत्वा यथावन्नरः
स्मृत्वाऽभीक्ष्णमिदं लभेत विशयं हित्वाऽऽत्मसाक्षात्कृतिम् ।
यत्त्वाह क्रममित्थमागमशिरस्तत्त्वावबोधोदये
सत्त्वाकार तदेव राम सुलभं न त्वामनत्वा नृणाम् ॥ ८॥

हन्तुं प्राक्तनदुष्कृतानि जगतां मन्तुं भृशानित्यतां
कन्तुं जेतुममुत्र चेह समुपारन्तुं फलेष्वादरात् ।
यन्तुं सेन्द्रियजातमागमशिरो गन्तुं च वक्राद्गुरोः
तन्तुं चण्डकरान्वयस्य कलये तं तुङ्गचापं प्रभुम् ॥ ९॥

इति श्रीरामाष्टप्रासस्तुतिः समाप्ता ।

Proofread by PSA Easwaran

*Shri Ramashtaprasastutih*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*